॥ शनिवज्रपञ्जरकवचम् ॥

Śani Vajrapañjara Kavacam

नीलांबरो नीलवपुः किरीटी

nīlāmbaro nīlavapuḥ kirīṭī

गृध्रस्थितस्त्रासकरो धनुष्मान् ।

gṛdhrasthitastrāsakaro dhanuṣmān ।

चतुर्भुजः सूर्यसुतः प्रसन्नः

caturbhujaḥ sūryasutaḥ prasannaḥ

सदा मम स्याद्वरदः प्रशान्तः ॥ १ ॥

sadā mama syādvaradaḥ praśāntaḥ ।। 1।।

ब्रह्मा उवाच ।

brahmā uvāca ।

शृणुध्वमृषयः सर्वे शनिपीडाहरं महत् ।

śṛṇudhvamṛṣayaḥ sarve śanipīḍāharaṁ mahat ।

कवचं शनिराजस्य सौरेरिदमनुत्तमम् ॥ २ ॥

kavacaṁ śanirājasya saureridamanuttamam ।। 2।।

कवचं देवतावासं वज्रपञ्जरसंज्ञकम् ।

kavacaṁ devatāvāsaṁ vajrapañjarasañjñakam |

शनैश्चरप्रीतिकरं सर्वसौभाग्यदायकम् ॥ ३ ॥

śanaiścaraprītikaraṁ sarvasaubhāgyadāyakam || 3||

ॐ श्रीशनैश्चरः पातु भालं मे सूर्यनन्दनः ।

om śrīśanaiścaraḥ pātu bhālaṁ me sūryanandanaḥ |

नेत्रे छायात्मजः पातु पातु कर्णौ यमानुजः ॥ ४ ॥

netre chāyātmajaḥ pātu pātu karṇau yamānujaḥ || 4||

नासां वैवस्वतः पातु मुखं मे भास्करः सदा ।

nāsāṁ vaivasvataḥ pātu mukhaṁ me bhāskaraḥ sadā |

स्निग्धकण्ठश्च मे कण्ठं भुजौ पातु महाभुजः ॥ ५ ॥

snigdhakaṇṭhaśca me kaṇṭhaṁ bhujau pātu mahābhujaḥ || 5||

स्कन्धौ पातु शनिश्चैव करौ पातु शुभप्रदः ।

skandhau pātu śaniścaiva karau pātu śubhapradaḥ |

वक्षः पातु यमभ्राता कुक्षिं पात्वसितस्तथा ॥ ६ ॥

vakṣaḥ pātu yamabhrātā kukṣiṁ pātvasitastathā || 6||

नाभिं ग्रहपतिः पातु मन्दः पातु कटिं तथा ।

nābhiṁ grahapatiḥ pātu mandaḥ pātu kaṭiṁ tathā |

ऊरू ममांतकः पातु यमो जानुयुगं तथा ॥ ७ ॥

ūrū mamāntakaḥ pātu yamo jānuyugaṁ tathā || 7||

पादौ मन्दगतिः पातु सर्वाङ्गं पातु पिप्पलः ।

pādau mandagatiḥ pātu sarvāṅgaṁ pātu pippalaḥ |

अङ्गोपाङ्गानि सर्वाणि रक्षेन् मे सूर्यनन्दनः ॥ ८ ॥

aṅgopāṅgāni sarvāṇi rakṣen me sūryanandanaḥ || 8||

इत्येतत्कवचं दिव्यं पठेत्सूर्यसुतस्य यः ।

ityetatkavacaṁ divyaṁ paṭhetsūryasutasya yaḥ |

न तस्य जायते पीडा प्रीतो भवति सूर्यजः ॥ ९ ॥

na tasya jāyate pīḍā prīto bhavati sūryajaḥ || 9||

व्ययजन्मद्वितीयस्थो मृत्युस्थानगतोऽपि वा ।

vyayajanmadvitīyastho mṛtyusthānagato'pi vā |

कलत्रस्थो गतो वापि सुप्रीतस्तु सदा शनिः ॥ १० ॥

kalatrastho gato vāpi suprītastu sadā śaniḥ || 10||

अष्टमस्थो सूर्यसुते व्यये जन्मद्वितीयगे ।

aṣṭamastho sūryasute vyaye janmadvitīyage |

कवचं पठते नित्यं न पीडा जायते क्वचित् ॥ ११ ॥

kavacaṁ paṭhate nityaṁ na pīḍā jāyate kvacit || 11||

इत्येतत्कवचं दिव्यं सौरेर्यन्निर्मितं पुरा ।

ityetatkavacaṁ divyaṁ saureryannirmitaṁ purā |

द्वादशाष्टमजन्मस्थदोषान्नाशयते सदा ।

dvādaśāṣṭamajanmasthadoṣānnāśayate sadā |

जन्मलग्नस्थितान् दोषान् सर्वान्नाशयते प्रभुः ॥ १२ ॥

janmalagnasthitān doṣān sarvānnāśayate prabhuḥ || 12||

॥ इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे

|| iti śrībrahmāṇḍapurāṇe brahmanāradasaṁvāde

शनिवज्रपञ्जरकवचं संपूर्णम् ॥

śanivajrapañjarakavacaṁ sampūrṇam ||